**श्यामग्रन्थि** स्त्री श्यामो ग्रन्थिरस्याः । गण्डदूर्वायां राजनि०

**श्यामपत्त्र** पु० श्यामानि पत्त्राणि यस्य । तमालवृक्षे शब्दच०

**श्यामल** पु० श्यामवर्णं लाति ला—क । १पिप्पले २कृष्णवर्णयुते त्रि० मेदि० । ३अश्वगन्धायां ४कट्भ्यां ५जम्ब्वां ६कस्तूर्याञ्च स्त्री राजनि० । ७श्यामवर्णे पु० अमरः ।

**श्यामलचूडा** स्त्री श्यामला चूडाऽस्याः । गुञ्जायां राजनि०

**श्यामलता** स्त्री कर्म० । १स्वनामख्याते शारिवौषधौ शब्दर० । श्यामलस्य भावः तल् । २कृष्णवर्णे ३हरिद्वर्णे च

**श्यामलिका** स्त्री श्यामलोवर्णोऽस्त्यस्याः ठन् । नील्यामोषधौ राजनि० ।

**श्यामलेक्षु** पु० कर्म० । (काजला) इक्षुभेदे राजनि० ।

**श्यामसुन्दर** पु० श्यामोऽपि सुन्दरः । श्रीकृष्णे "श्यामसुन्दर ! ते दास्यः" इति भागवते १०स्क० २२अ० । "ध्यायन्ति योगिनस्तत्त्व शुद्धं ज्योतिःस्वरूपिणम् । हस्तपादादिरहितं निर्गुणं प्रकृतेः परम् । वैष्णवास्तन्न मन्यन्ते तद्भक्ताः सूक्ष्मदर्शिनः । कुतो बभूव तज्ज्योतिरहो तेजस्विनं विना । ज्योतिरभ्यन्तरे नित्यं शरीरं श्यामसुन्दरम्" ब्रह्मवै० गणपतिख० ४१ अ० ।

**श्यामा** स्त्री श्यै—मन् । १शारिवौषधौ २अप्रसूताङ्गनायां ३प्रियङ्गौ ४यमुनायां ५वागुजौ ६रात्रौ ७कृष्णत्रिवृति ८नील्यां मेदि० ९गुग्गुलौ १०सोमलतायां ११गुन्द्रायां १२कृष्णायाम् १३अम्बिकायां विश्वः । १४गुडूच्यां १५कस्तूर्यां १६वटपत्त्र्यां १७वन्दायां १८नीलपुनर्नवायां १९पिप्पल्यां २०हरिद्रायां २१नीलदूर्वायां २२तुलस्यां २३पद्मबीजे २४गवि २५छायायां २६कृष्णशारिकायां २७शिंशपायां २८पक्षिभेदे (शामा) राजनि० । "शीतकाले भवेदुष्णा ग्रीष्मे च सुखशीतला । तप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कीर्त्तिता" इत्युक्तलक्षणे २९स्त्रीविशेषे च । ३०हिमालयसुतायां काल्यां च "ततः सा कालिका देवी योगनिद्रा जगन्मयी । पूर्वत्यक्तसतीरूपा जन्मार्थं मेनकां ययौ । समयस्यानुरूपेण मेनका जठरे शिवा । सम्भूय च समुत्पन्ना सा लक्ष्मीरिव सागरात् । वसन्तसमये देवी नवम्यां मृगयोगतः । अर्द्धरात्रौ समुत्पन्ना गङ्गेव शशिमण्डलात् । तान्तु दृष्ट्वा यथा जातां नीलोत्पलदलानुगाम् । श्यामां सा मेनका देवी मुदमापातिहर्षिता" कालिकापु० ४० अ० ।

**श्यामाक** पु० श्याम इव कायति कै—क । (श्यामा) धान्यभेदे "श्यामाकः शोषणो रूक्षो वातलः कफपित्तहृत्" भावप्र०

**श्यामाङ्ग** पु० श्यामं हरिद्वर्णमङ्गमस्य । १बुधग्रहे त्रिका० । २कृष्णदेहे त्रि० स्त्रियां ङीष् । "श्यामाङ्गीं विगताम्बराम्" तन्त्रम् ।

**श्यामाम्ली** स्त्री कर्म० । नीलाम्लीक्षुपे राजनि० ।

**श्यामिका** स्त्री श्याम+वा० भावे ठन् । १श्यामत्वे २स्वर्णादिमालिन्ये च "हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा" रघुः ।

**श्याल** पु० श्यै—कालन् । पत्नीभ्रातरि अमरः । स्वार्थे ठक् । श्यालिकोऽप्यत्र । [पत्नीभगिन्याम् शब्दच० ।

**श्यालिका** स्त्री श्यै-कालन् संज्ञायां कन् । अत इत्त्वम् ।

**श्याव** पु० श्यै—वन् । १कृष्णपीतमिश्रवर्णे २तद्वति त्रि० अमरः

**श्यावदत्** त्रि० श्यावो दन्तो यस्य दत्रादेशः । श्यामवर्णदन्तयुक्ते स्त्रियां ङीप् ।

**श्यावदन्त** पु० कर्म० । १स्वभावतः कृष्णवर्णयुक्ते दन्ते ६ब० कप् । २तद्युक्ते त्रि० "सुरापः श्यावदन्तकः" विष्णुस्मृ०

**श्येत** पु० श्यै—इतन् । १शुक्लवर्णे २तद्वति त्रि० स्त्रियां ङीप् तस्य नश्च । श्येनी । [हारा० स्त्रियां ङीप् ।

**श्येतकोलक** पुंस्त्री० श्वेतः कोल इव । (पुँटि) मत्स्यभेदे

**श्येन** पुंस्त्री० श्यै—इनन् । १पक्षिभेदे (बाज) अमरः । २पाण्डुरवर्णे च ३तद्वति त्रि० मेदि० । तत्खगस्य शुभाशुभसूचनं यथा "प्रदक्षिणोत्तस्य नरं व्रजन्तो यात्रासु वामेन गताः प्रवेशे । श्येनाः प्रशस्ताः प्रकृतस्वरास्ते शान्ताः प्रदीप्ता विततस्वरास्ते । श्येनो नृणां दक्षिणवामपृष्ठभागेषु भाग्यैः स्थितिमादधाति । तिष्ठन् पुरस्तान्मृतये करोति युद्धे जयं कुञ्जरयष्टिजस्थः" इति वसन्तराजः । "श्येनेनाभिचरन् यजेत" श्रुतिविहिते २यागभेदे अभिचारशब्दे दृश्यम् ।

**श्येनघण्टा** स्त्री श्येनी घण्टेव । दन्तीवृक्षे राजनि० ।

**श्यै** गतौ भ्वा०आ०सक० अनिट् । श्यायते अश्यास्त ।

**श्यैनम्पाता** स्त्री श्येनस्य पातो यत्र अण् मुम् च । मृगयायाम् अमरः ।

**श्यो(शो)नाक** पु० श्यै—ओना(शा)क । (शोणा) क्षुपभेदे । "श्योनाको दीपनः पाके कटुकस्तुवरो हिमः । ग्राही तिक्तोऽनिलश्लेष्मपित्तकासप्रणाशनः । कटु तस्य फलं बालं रूक्षं वातकफापहम् । हृद्यं कषायं मधुरं रोचनं लघु दीपनम् । गुल्मार्शःकृमिहृत् प्रोक्तं गुरुवातप्रकोपणम्" भावप्र० ।

**श्रक** सर्पणे भ्वा०आ०सक० सेट् इदित् । श्रङ्कते अश्रङ्किष्ट ।